Printed Pages – 4

# I-1118

## M.A. (Previous) Examination, 2020

## SANSKRIT

### Paper - V

### (काव्य)

***Time Allowed : Three Hours***

***Maximum Marks : 100***

***Minimum Pass Marks : 36***

**सूचना** : सर्वे प्रश्नाः समाधेयाः, प्रश्नेषु अङ्काः निर्धारिताः सन्ति।

**इकाई–I**

**Q. 1.** (क) अधोलिखितेषु कयोश्चित् द्वयोः सप्रसङ्गं व्याख्या विधेयाः। **15**

(1) प्रत्यासन्ने नभसि दयिता-जीविता-लम्बनार्थी,
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम्।
सः प्रत्यग्रै कुटजकुसुमैः कल्पितार्घाय तस्मै,
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार।।

(2) रत्नच्छायाऽऽव्यतिकर इव प्रेक्ष्यमेतत् पुरस्तात्,
वल्मीकाग्रात् प्रभवति धनुष्खण्डमाखण्डलस्य।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते,
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः।।





(3) ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी,
पुत्रप्रेम्णाकुवलयदल प्रापि कर्णे करोति।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं,
पश्चादद्रि-गहण-गुरुभिर्गर्जितैर्नतयेथाः।।

(ख) (1) मेघदूतमधिकृत्य प्रकृतिचित्रणं कुर्यात्। **10**

**अथवा**

(2) मेघदूतमधिकृत्य उज्जयिनीनगरीं वर्णयत।

**इकाई–II**

**Q. 2.** (क) अधोलिखितेषु कयोश्चिद् द्वयोः पद्ययोः सप्रसङ्गं व्याख्या कार्याः – **20**

(1) सत्यं न मे विभवनाशकृताऽस्ति चिन्ता,
भाग्यक्रमेण हि धनानि भवन्ति यान्ति।
एतत्तु मां दहति नष्टधनाश्रयस्य,
यत् सौहृदादपि जनाः शिथिली भवन्ति।।

(2) इयं हि निद्रा नयनावलम्बिनी,
ललाटदेशादुपसर्पतीव माम्।
अदृश्यरूपा चपला जरेव या
मनुष्यसत्वं परिभूय वर्धते।।

(3) इन्द्रः प्रवाह्यमाणो गोप्रसवः
संक्रमश्च ताराणाम्।
सुपुरुषप्राणविपत्तिः
चत्वार इमे न दृष्टव्याः।।

(ख) मृच्छकटिक प्रकरणस्य तृतीयाङ्कस्य कथासारांशं वर्णयत। **10**

**अथवा**

मृच्छकटिकमधिकृत्य धूतायाः चरित्रं विवेचयत।

**इकाई–III**

**Q. 3.** अधोलिखितेषु कयोश्चिद् द्वयोः श्लोकयोः सप्रसङ्गं व्याख्या कार्या– **20**

(क) यदस्य यात्रासु बलोद्धतं रजः,
स्फुरत्प्रतापानलधूममञ्जिम।
तदेव गत्वा पतितं सुधाम्बुधौ,
दधाति पङ्कीभवदङ्कतां विधौ।।

(ख) नलस्य पृष्टा निषधागता गुणान्,
मिषेण दूतद्विजवन्दिचारणाः।
निपीय तत्कीर्तिकथामथानया,
चिराय तस्थे विमनायमानया।।

(ग) प्रकाममादित्यमवाप्य कण्टकैः,
करम्बिंतामोदभरं विवृण्वती।
धृतस्फुटश्रीगृहविग्रहा दिवा
सरोजनी यत्प्रभवाप्सरायिता।।





**इकाई–IV**

**Q. 4.** सप्रसङ्गं श्लोकद्वयोः व्याख्या कार्या : **15**

(क) प्रारम्भेऽस्मिन्स्वामिनो वृद्धिहेतौ,
दैवेनेत्थं दत्तहस्तावलम्बे।
सिद्धेर्भ्रान्तिर्नास्ति सत्यं तथापि,
स्वेच्छाचारी भीत एवास्मि भर्तुः।।

(ख) आताम्रतामपनयामि विलक्ष एषः,
लाक्षाकृतां चरणयोस्तव देवि मूर्ध्ना।
कोपोपरागजनितां तु मुखेन्दुबिम्बे,
हर्तुं क्षमो यदि परं करुणा मयि स्यात्।।

(ग) हरिहरब्रह्मप्रमुखान्देवान्
दर्शयामि देवराजं च।
गगने सिद्धचारणसुरवधू–
सार्थं च नृत्यन्तम्।।

**इकाई–V**

**Q. 5.** नैषधीयचरितमधिकृत्य नलस्य गुणान् वर्णयत। **10**

**अथवा**

रत्नावलीनाटिकानुसारं यौगन्धरायणस्य चरित्रचित्रणं विवेचयत।